जिदन्तरं तत्संज्ञकं गवामयनिकमेतत् कर्क॰ । संवत्सरसाध्ये गवामयने २षष्ठमासीयपञ्चविंशतितमदिने यथोक्तम् ता॰भाष्ये "तत्र षष्ठे मासादौ त्रयोऽभिप्लवाः षड़हाः कार्य्याः तत एकः पृष्ठ्यः षड़हः ततोऽभिजिदेकमहः" इति । अभिजिन्मुहूर्त्तस्य च किञ्चिदूनदिनार्द्धप्रवृत्तेः तत्साम्यात् पञ्चविंशतिदिनाधिकपञ्चममासस्य किञ्चिदूनदैवदिवसार्द्धतुल्यतयास्याभिजिच्छब्दवाच्यता ६ तद्दिनकर्त्तव्ये ७ अतिरात्रयागादौ च उपचारात् अतएव ताण्ड्यभाष्ये "षष्ठे मासि त्रीनभिप्लवान् एकं पृष्ठ्यञ्च कृत्वाऽभिजिदनुष्ठेयः" इत्युक्तम् विवरणं गवामयनशब्दे दृश्यम् । "अभिजिदतिरात्र" इति शत॰ब्रा॰ ।"अतिरात्रसंस्थः अभिजिन्नामके दिने कार्य्य" इति भा॰ ।

**अभिजित** पु॰ अभिजीयादन्यान् संज्ञायामाशोर्व्वादे देवरातादिवत् क्तच् । अर्द्धरात्रसम्बन्धिनि मुहूर्त्ते "अहं त्वभिजिते योगे निशाया यौवने स्थिते । अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखम्" । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम् विष्णु पु॰ ।

**अभिजिति** स्त्री अभि+जि—भावे क्तिन् । अभिजये "एषां लोकानामभिजित्यै" शत॰ब्रा॰ ।

**अभिज्ञ** त्रि॰ अभिजानाति अभि+ज्ञा—क । १ निपुणे, २पण्डिते ३ ज्ञातरि चेतने "अन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्" भाग॰ । अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः कुमा॰ "शङ्कस्वनाभिज्ञतया निवृत्ताः" रघुः ।

**अभिज्ञा** स्त्री अभि—ज्ञा—अङ् । १ प्रथमसुत्पन्ने ज्ञाने । २ संस्कारसहकृते इन्द्रियसन्निकर्षजन्ये प्रत्यभिज्ञारूपे ज्ञाने च ।

**अभिज्ञात** त्रि॰ अभिज्ञायतेस्म अभि+ज्ञा—कर्म्मणि क्त । कालान्तरे पुनर्दृष्ट्या जातेन सोयमित्याकारकज्ञानेन विषयीकृते पूर्व्वदृष्टे पदार्थे ।

**अभिज्ञान** न॰ अभिज्ञायतेऽनेन अभि+ज्ञा—करणे ल्युट् । सोऽयमिति ज्ञानसाधने १चिह्ने । "चिह्नभूतं त्वभिज्ञानं त्वमङ्ग कर्त्तुमर्हसि" "उपपन्नैरभिज्ञानैर्दूतं तमवगच्छत" इति च रामा॰। भावे ल्युट् । तदिदमित्याकारके २ज्ञाने च । तच्च संस्कारसहकृतं पुरोवर्त्तिनि इन्द्रियसन्निकर्षजन्यं प्रत्यक्षविलक्षणं स्मृतिविलक्षणञ्च ज्ञानम् । "तदभिज्ञान हेतोर्हि दत्तं तेन महात्मना" रामा॰ ।

**अभिज्ञानशकुन्तला** स्त्री अभिज्ञायते कर्म्मणि ल्युट् तथाभूतां शकुन्तलामधिकृत्य कृताख्यायिका "तदधिकृत्य कृते ग्रन्थे" पा॰ अण् आख्यायिकायां तस्य वा लुपि व्यक्तिवचनतेति स्त्रीत्वम् । कालिदासकृतौ दुष्यन्तेन गान्धर्वविधिना कृतोपयमां कण्वकन्यां शकुन्तलामधिकृत्य कृते नाटकभेदे तस्याश्च दुर्वासःशापात् प्रथमं दुष्मन्तेनानभिज्ञानात् पश्चाच्च स्वदत्ताङ्गुरीयकरूपाभिज्ञानदर्शनेन प्रत्यभिज्ञातत्वात् तामधिकृत्याख्यायिकारूपत्वान्नाटकस्य तथात्वम् । "कालिदासस्य सर्वस्वमभिज्ञानशकुन्तला" लुबभावे आभिज्ञानशकुन्तलम् न॰ । "नवेनाभिज्ञानशकुन्तलेनेति" शकु॰ ।

**अभिज्ञु** त्रि अभिगते आभिमुख्येन स्थापिते जानुनी येन वेदे बा॰ज्ञु १ आभिमुख्येनावस्थापितजानुयुक्ते । "संजानाना उपसीदन्नभिज्ञु" ऋ॰१,७२,५ ।

**अभितराम्** अव्य॰ अभि+प्रकर्षे—तरप् आमु । १ आभिमुख्यातिशये २ शनैःशनैराभिमुख्ये च "अभितरान्तु वै जयन् क्रामति तस्मादभितरामभितरामेव क्रामेत्" शत॰ब्रा॰ । "अभितराम् उ वै शत्रोरत्यन्तमभिमुखं खलु, अग्नावपि ईषदीषत् पुरस्तादाक्रामेदिति" भा॰ ।

**अभितस्** अव्य॰ अभि+तसिल् । सामीप्ये, आभिमुख्ये, उभयतोऽर्थे, शीघ्रतायाञ्च । एतद्योगे द्वितीया "अभिसर्वतसोःकार्य्या धिगुपर्य्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु तथान्यत्रापि दृश्यते" इत्युक्तेः । "अङ्गान्ययाचीदभितः प्रधानमिति" भट्टिः "अभितस्तं पृथासूनुः स्नेहेन परितस्तरे" किरा॰ "कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितोब्रह्मनिर्वाणमिति" गीता २साकल्ये च । "पर्य्यभिभ्याञ्च" पा॰ "सर्वोभयार्थाभ्यामेव वा॰ उक्तेः सर्व्वोभयार्थयोरेवास्य साधुता ।

**अभिताप** पु॰ अभि+तप—घञ् । भृश सन्तापे ।

**अभिताम्र** पु॰ भृशं ताम्रं प्रा॰स॰ । १ अत्यन्तताम्रवर्णे २ तद्वति त्रि॰ "रामस्तमभिताम्राक्षं वृक्षशाखावलम्बिनम्" रघुः ।

**अभितोमुख** त्रि॰ अभितः मुखमस्य । १ सर्वदिङ्मुखे ।

**अभिदर्शन** न॰आभिमुख्येन दर्शनम् अभि+दृश—भावे ल्युट् । आभिमुख्येन दर्शने, "ग्रामघाते हिताभङ्गे परेषामभिदर्शने" मनुः । [स्मृतौ च ।

**अभिद्रा** स्त्री अभि+द्रा—अङ् । १ पलायने, २अभिध्यायाम्

**अभिदि(धि)प्सु** त्रि॰ अभि+दम्भ—सन् उ वेदे नदस्य धः । १अभिभवनेच्छावति "विश्वा इदर्य्यो अभिदिप्सुः" इति ऋ॰ २,२३,१३ । "अभिदिप्सः अभिभवनेच्छावती छान्दसम्" भा॰